असितव्यम्, आसयितव्यम्, असिसिषितव्यम्;
असनीयम्, आसनीयम्, असिसिषणीयम्;
आस्यम्, समस्या[1], आस्यम्, असिसिष्यम्;
ईषदसः, दुरसः, स्वसः; — —
[A]अस्यमानः, आस्यमानः, असिसिष्यमाणः;
निरासः, व्यासः,[B] प्रासः[2] इष्वासः[2A], आसः, असिसिषः;
असितुम्, आसयितुम्, असिसिषितुम्;
अस्तिः, उपास्तिः, आसना, असिसिषा, आसिसयिषा;
निरसनम्, निरासनम्, असिसिषणम्;
[3]असित्वा, अस्त्वा, आसयित्वा, असिसिषित्वा;
पर्यस्य-न्यस्य[C]-निरस्य, निरास्य, निरसिसिष्य;
आसम् २ } [4]द्रुचहात्यासं } आसम् २, } असिसिषम् २; }
असित्वा २ } गाःपाययति, } आसयित्वा २, } असिषित्वा २; }
अस्त्वा २;
[5]असुरः, असिः[6].

## (54) "अंस[D] सङ्घाते" (X-चुरादिः-1918. सक. से. उभय.)

### अदन्तः।

अंसकः-सिका, अंसिसयिषकः-षिका;
अंसयिता-त्री, अंसिसयिषिता-त्री;

---

1. बाहुलकात् संज्ञायां क्यपि **समस्या** इति रूपं साधु।
2. प्रास्यते इति प्रासः। 'अकर्तरि च कारके संज्ञायाम्' (3-3-19) इति भावे घञ्।
2A. इषवोऽस्यन्ते अनेन इति **इष्वासः**। 'हलश्च' (3-3-121.) इति करणे घञ्। '**इष्वासो** धन्वधन्विनोः' इति **हैमः**।' इति **अमरसुधा**।
3. 'उदितो वा' (7-2-56) इतीड् वा।
4. 'अस्यतितृषोः क्रियान्तरे कालेषु (3-4-57) इति णमुल्।
5. 'असेरुरन्' (द. उ. 8-24.) इति उरन्।
6. अस्यतीति = **असिः**। इः प्रत्ययः। (द. उ. 1. 68.)

A. 'दीव्यमानं शितान् बाणान् **अस्यमानं** महागदाः।' भ. का. (5-81.)

B. 'नाडायनो बादरिकश्च तस्मै **व्यासश्च** कानीनमुनिर्गरीयान्।' वा. वि. 1-64.

C. 'भ्रातरि **न्यस्य** यातो मां मृगावित् मृगयामसौ' भ. का. (5. 82.)

D. "अंश समाघाते'। समाघातो = विभाजनम्। अंशयति। **चन्द्रो** दन्त्यान्तमाह-अंसयति। मयूरव्यंसकः।" इति **क्षीरतरङ्गिणी**।